# Shri Subrahmanya Stotram

# શ્રીસુબ્રહ્મણ્યસ્તોત્રમ્

## Document Information

Text title : subrahmaNyastotram 3

File name : subrahmaNyastotram3.itx

Category : subrahmanya

Location : doc_subrahmanya

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 07-02

Latest update : February 11, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2021

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યસ્તોત્રમ્

ષડ્વક્ત્રં શિખિવાહનં ત્રિનયનં ચિત્રામ્બરાલઙ્કૃતં
 શક્તિં વજ્રકૃપાણશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા-
 ધ્યાયેદીપ્સિતસિદ્ધિદં શિવસુતં સ્કન્દં સુરેન્દ્રં સદા ॥ ૧॥

સિન્દૂરારુણકાન્તિમિન્દુવદનં કેયૂરહારાદિભિઃ
 દિવ્યૈરાભરણૈર્વિભૂષિતતનું સ્વર્ગસ્થસૌખ્યપ્રદમ્ ।
અમ્ભોજાભયશક્તિકુક્કુટધરં રક્તાઙ્ગરાગોજ્જ્વલં
 સુબ્રહ્મણ્યમુપાસ્મહે પ્રણમતામિષ્ટાર્થસિદ્ધિપ્રદમ્ ॥ ૨॥

ષડાનનં ચન્દનલેપિતાઙ્ગં
 મહાદ્યુતિં દિવ્યમયૂરવાહનમ્ ।
મહેશસૂનું સુરલોકનાથં
 બ્રહ્મણ્યદેવં શરણં પ્રપદ્યે ॥ ૩॥

રુદ્રપ્રિયં દિવ્યમનોહરાઙ્ગં
 કુષ્ઠાદિરોગાન્ સ્મરણાદ્ધરન્તમ્ ।
ઉચ્છિષ્ટલેપાત્તનુશુદ્ધિદં ત્વાં
 બ્રહ્મણ્યદેવં શરણં પ્રપદ્યે ॥ ૪॥

ઇષ્ટાર્થદં ભક્તજનસ્ય કામ
 મૃષ્ટાન્નદાતારમુમેશસૂનુમ્ ।
અઘૌઘનાશં ચ (વિધ્વંસિ) નિજોત્તમાઙ્ગં (ઙ્ઘ્રિં)
 બ્રહ્મણ્યદેવં શરણં પ્રપદ્યે ॥ ૫॥

આર્યાત્મજં દેવગણાધિસેવ્યં
 સ્તોત્રેણ દેહેન કુલં કરોતિ ।(?)
ત્વં દેવદેવં ત્વમુપાશ્રયન્તં (?)
 બ્રહ્મણ્યદેવં શરણં પ્રપદ્યે ॥ ૬॥

(ત્વાં દેવદેવં સમુપાશ્રિતાનાં
 સ્તોત્રેણ ચૈતેન કુલં કરોષિ ।
આર્યાત્મજં દેવગણાધિસેવ્યં
 બ્રહ્મણ્યદેવં શરણં પ્રપદ્યે ॥ ૬॥)
દ્વિષડ્ભુજં ષણ્મુખમમ્બિકાસુતં
 કુમારમાદિત્યસમાનતેજસમ્ ।
વન્દે મયૂરાસનમગ્નિસન્નિભં
 સેનાપતિં સ્કન્દમભીષ્ટસિદ્ધયે ॥ ૭॥

॥ ઇતિ શ્રીસુબ્રહ્મણ્યસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Subrahmanya Stotram*
pdf was typeset on February 14, 2021

Please send corrections to *sanskrit@cheerful.com*